Volume-11, No. 1 Feb.-2024, pp. Hin.16-21

# वाक्यार्थविमर्शः

**श्री सोहन आर्यः सहायकाचार्यः**
डी पी बी एस कॉलेज, अनूपशहरम् उत्तर–प्रदेश भारतम्।
**श्री तरुणकृष्णः** शोधच्छात्रः
संस्कृतविभागः (दिल्ली विश्वविद्यालयः) भारतम्।

भावाभिव्यक्तिसाधनं भाषा कथ्यते। यद्यपि आंगिकाहार्यादिभिरपि भावसम्प्रेषणं भवति तथापि भाषाया यादृशं सुस्पष्टं कतिपयप्रामाणार्जितं सत्ताविषयकं ज्ञानं विचारो वा भाषया संक्रमितं भवति। न तादृशं केनचिद् अन्येन साधनेन भवितुम् अर्हति। सामन्यरूपेण वदामश्चेत् भाषा द्वयोः जीवयोर्मध्ये विचारसम्प्रेषणस्य साधनं वर्तते। भाषया एव श्रोतुः शाब्दबोधः भवति। शब्दबोधो नाम वाक्यैः भूयमानमर्थज्ञानम्।
शाब्दबोधः शब्दप्रमाणेन भवति। प्रमाणं नाम प्रमाकरणम। प्रमा च यथार्थानुभवः कथ्यते। एवं सर्वमपि शब्दज्ञानं प्रमा न वक्तुं शक्यते। न्यायसूत्रे आप्तवाक्येन शब्दप्रमाणत्वमभिधीयते।

**शब्दज्ञानापेक्षितस्थितयः** – श्रोता, वक्ता, पदलक्षणम, मीमांसकमतम्

भाषया विचारसंक्रन्तौ पक्षद्वयं वर्तते। एकः वक्ता अपरश्च श्रोता। शब्दज्ञाने च उभावधिकृत्य केचन् पक्षाः ध्यातव्याः सन्ति–

- वक्ता भाष्यमाणवाक्येभ्यः यानि पदानि चिनुते तानि श्रोत्रा अपि ज्ञायेरन्।
- न केवलं पदज्ञानमपितु पदार्थयोः संबन्धज्ञानं तस्य बुद्धौ अवतिष्ठेत।
- पदजन्यज्ञानेन सह वाक्ये प्रयुक्तपदानां मध्ये आकांक्षायोग्यतासन्निधितात्पर्यज्ञानमपि भवेत।

अनेन स्पष्टमेव यत् शब्दबोधः प्रक्रियायां तिस्रः स्थितयो भवन्ति। पदज्ञानं, पदार्थज्ञानं, वाक्यान्वितपदैः वाक्यार्थज्ञानं चेति। समेषाम् अपि पार्थक्येनात्र विचारः करिष्यते।

**भाषाव्यवहारप्रक्रिया–**

उपर्युक्तविवेचनेन स्पष्टमेतत् यत् भाषा व्यवहारे पक्षद्वयं वर्तते। वक्ता श्रोता च।

1. **वक्ता**– वक्ता संकेतग्रहाणां माध्यमेन पदार्थज्ञानं कुरुते। यदा सः अर्थसम्बन्धिज्ञानं श्रोतारं सम्प्रेषिष्यति तदा पदप्रयोगं करोति।
2. **श्रोता–** श्रोता यदा वक्तृमाध्यमेन पदं श्रृणोति तदा पदसम्बन्ध्यर्थः बुद्धौ प्रकाशितः भवति। तत्पदसम्बन्ध्यर्थः बुद्धौ वृत्या एव ज्ञायते। यदि वृत्तिः न स्यात् तर्हि घटपदेन आकाशस्यापि शाब्दबोधः स्यात। उभयोर्दृशा व्यवहारप्रक्रिया निम्नलिखिता वर्तते।

- **वक्तृदृशा**

**शब्दप्रमाणलक्षणम–**

यदा वक्ता श्रोतारं विषयं ज्ञापयितुं वाक्योच्चारणं करोति तदा तज्जन्यं शाब्दज्ञानं प्रमात्वेनभिधीयते। तस्याः प्रमायाः करणं शब्दप्रमाणमित्यभिधीयते। न्यायसूत्रे शब्दप्रमाणस्य लक्षणमधोलिखितं वर्तते–
आप्तोदेशः शब्दः।

**आप्तः** सामान्येन आप्त इति पदस्यार्थः विश्वसनीयो जनः इति भवति परं न्यायभाष्यकारः आप्तः इति पदस्य लक्षणमेवं विदधाति– आप्तः खलु साकाक्षत्कृतधर्मा यथादृष्टस्यार्थस्यचिख्यापयिषया प्रयुक्त उपदेष्टा। अत्र चिख्यापयिषया इति पदस्य अर्थं जयन्तभट्टः वीतरागता इति करोति– "चिख्यापयिषया युक्त इत्युक्ता वीतरागता" द्य

**पदलक्षणम्–**

शब्दप्रमाणं विज्ञाय पदमिति किम् इति ज्ञानमावश्यकं यतोहि पदसमूहः वाक्यं कथ्यते। यावत्पदज्ञानं नाभविष्यत् तावद् वाक्यज्ञानमपि नाभिव्यक्तो भविष्यत।

(1) **मीमांसकमतम्–**

मीमांसकमते वर्णाः एव पदानि सन्ति। वर्णम् इत्युक्ते तेषामभिप्रायः वर्णसंघात न वर्तते। "तस्माद् गौरिति गकारादिविसर्जनीयान्तपदम् अक्षराण्येव। अतो न तेभ्यो व्यतिरिक्तमन्यत्पदं नाम।" परं वर्णसमूहमात्रं पदं न वक्तुं शक्यते यतोहि एवं सति कचटतप इति वर्णसमूहे लक्षणस्यातिव्याप्तिर्भवति। अत एव साहित्यदर्पणकारः प्रयोगार्हानन्वितान् एकार्थबोधकान् वर्णसमूहान् पदं कथयति।

(2) **व्याकरणमतम्–**

व्याकरणमते सुबन्तं तिङन्तं च पदसंज्ञं भवति। व्याकरणस्योद्देश्यं पदसाधुत्वमात्रख्यापनं वर्तते अतः लक्षणमेतत् तन्मते युक्तमेव परं पदस्य प्रयोगः अर्थं ज्ञापयितुं भवति।

(3) **न्यायमतम्–** न्यायमते शब्दविषयकानि विभिन्नानि मतानि प्राप्यन्ते।

- सूत्रकारमते सुप्तिङ्विभक्तत्यन्ताः पदसंज्ञयाब्धिीयन्ते विभक्तिश्च द्विविधा वर्त्तते नामिकी आख्यातिकी च।
- तर्कभाषाकारमते वर्णसमूहः एव पदं वर्तते। वर्णसमूहेन तात्पर्यं तस्य एकज्ञानविषयीभावः वर्तते।
- मुक्तावलीकारमते यस्मिन् शब्दे अर्थमभिव्यञ्जितुं क्षमता वर्तते। क्षमता भवति तत्पदसंज्ञं भवति।
- शंकरमिश्रमते संकेतविशिष्टवर्णः पदसंज्ञं भवति।

**पदभेदाः–**

पदं चतुर्विधं भवति तद्यथा–

- **यौगिकम्**– अवयवानामवधारेण अर्थात् प्रकृतिप्रत्ययविभागेन पदार्थबोधो भवति। यथा पाचकादिपदम।
- **रूढम्–** यत्रावयवशक्तिमर्थात् व्युत्पत्तिशक्तिमनपेक्ष्य समुदायशक्त्या अर्थबोधो भवति तद्रूढम। यथा गोमण्डपादिकम। अत्र गौः इति पदेन गोव्यक्तेर्बोधः भवति न तु गच्छतीति गौरिति व्युत्पत्त्या यौगिकपदवत् बोधो भवति।
- **योगरूढम्**– यत्र अवयवसमुदायोभाभ्यां शक्तिभ्याम् अर्थबोधः भवति तत् योगरूढमिति कथ्यते। यथा पंकजः अत्र अवयवशक्त्या पंकाज्जायते इति पंकजः इत्यनेन अपि च समुदायशक्त्या च पद्मत्वविशिष्टार्थः बोधः भवति।
- **यौगिकरूढम्**– यत्र अवयवशक्तिलभ्यः समुदायशक्तिलभ्यश्चोभावपि अर्थो स्यातां तत्पदं यौगिकरूढम् भवति। यथा–उद्भिद् इति पदस्य अवयवशक्त्या "ऊर्ध्वं भिनत्तीति उद्भिद् इति अनया वृक्षस्य लतायाः वा बोधो भवति समुदायशक्त्या च पशुप्राप्त्यै भूयमानस्य यागविशेषस्य बोधः भवति।

**वाक्यलक्षणम्–**

वाक्यस्य निर्धारणं विभिन्नैः आचार्यैः पृथक् पृथक् कृतमस्ति। तत्र वाक्यस्य लक्षणेऽनेके मताः दृष्टिपथमायान्ति। कात्यायनपतञ्जलिराचार्यैः विभिन्नलक्षणानि गृहन् वाक्यस्य चत्वारि लक्षणानि विहितानि।

"आख्यातं साव्ययकारकविशेषणं वाक्यम।"

क्रियया सह अव्ययं कारकं विशेषणं यदि स्यात् तु तद् वाक्यं भवति। यदि एते युगपत् अयुगपत् वा क्रियया सह आयान्ति तु तद्वाक्यं भवति। यथा– ओदनं मृदु विशदं भवति। उच्चैः पठति, ओदनं पचति।

"सक्रियाविशेषणं च" अस्य वाक्यस्य लक्षणस्य समावेशो उपर्युक्तलक्षणे कर्त्तव्यः। यथा– सुष्ठु पचति।

"आख्यातं सविशेषणम" अस्य लक्षणस्य समावेशो प्रथमलक्षणे एव भवति। कैयटानुसारेण अत्र आख्यातपदेन कृदन्तक्रियायाः ग्रहणं कर्त्तव्यम। यथा– देवदत्तेन शयितव्यम।

**"एकतिङ्"**

एकस्य तिङन्तपदस्य अपि वाक्यसंज्ञा भवति। यथा–'ब्रूहि–ब्रूहि' अत्र कैयटानुसारेण एकशब्देन संख्या न ग्रहीतव्या अपितु समानार्थस्य वाचकः, अतः एकार्थकयोः तिङन्तपदयोः वाक्यसंज्ञा भवति।

**नैयायिकमतम्**

जगदीशाचार्यः शब्दशक्तिप्रकाशिकायां वाक्यस्य लक्षणं करोति– मिथः "साकांक्षाशब्दस्य व्यूहो वाक्यं चतुर्विधम।" न्यायमते आकांक्षायोग्यतासन्निधिमतां पदानां समूहः वाक्यमिति कथ्यते। "वाक्यं तु आकांक्षायोग्यतासन्निधिमतां पदानां समूहः।"

वाक्ये सर्वाण्यपि पदानि सम्मिल्य एकमर्थं अभिव्यञ्जयन्ति। यथा उच्यते जयन्तभट्टेन –

"यथा हि बाह्यानि करणानि काष्ठादीनि पाके व्याप्रियन्ते यथा च शिबिकायाः अधन्तारः शिबिकामुच्छन्ति तथा सर्वाण्यपि पदानि वाक्यार्थमवबोधयन्ति।"

**शाब्दबोधकारणानि–**

कस्मिन्नपि वाक्यश्रवणे सति वाक्यान्तर्गतसमेषां पदानां श्रवणेन्द्रियप्रत्यक्षं भवति। तेषां पदानामेव प्राक् अर्थस्य स्मरणं क्रियते। पदश्रवणस्य कार्यं शाब्दबोधस्य कारणं पदार्थस्मरणमेव वर्त्तते। यः कारणादुपद्य कारणोत्पन्नस्य फलस्य जनकः भवति स व्यापारः कथ्यते, अतः एव पदार्थस्मरणं व्यापारो वर्त्तते। यथोच्यते

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।

शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी॥

**पदार्थबोधहेतुः**

शाब्दबोधो शक्तिज्ञानमपि अवान्तररूपेण अथवा सहकारिकारणरूपेण परिगणितं वर्त्तते। तात्पर्यमेतत् एव यत् संकेतज्ञानाभिज्ञं पुरुषमेव पदश्रवणानन्तरं पदार्थबोधः भवति। यथा गौरिति पदश्रवणानन्तरं सास्नालांगूलककुदमिति प्राणीविशेषो जायमानस्य संकेतस्य ज्ञानं यं पुरुषं

भवतिन् अर्थात् अस्मात् पदात् अयमर्थो बोद्धव्य इति सा इच्छाशक्तिः कथ्यते।
प्राचीननैयायिकाः ईश्वरेच्छां संकेतं मन्यन्ते–
"अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसंकेतः शक्तिः।"
नव्यनैयायिकानां मते वक्तुरिच्छापि संकेतो भवति–
"नव्यास्तु ईश्वरेच्छा न शक्तिः किन्तु इच्छैव, तेनाधुनिकसंकेतितेऽपि शक्तिरस्त्येव इत्याहुः।"
अत्र शक्तिग्रहसाधनानि अपि ज्ञातव्यानि। शक्तिग्रहस्य अष्टौ साधनानि सन्ति तद्यथा–
शक्तिग्रहं व्याकरणोपमानं कोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥

**वाक्यार्थज्ञानहेतुः–**

आकांक्षायोग्यतासन्निधिमत्पदसमूहः वाक्यं कथ्यते। वाक्यार्थज्ञाने त्रयाणामपि अपेक्षा वर्त्तते। एतेषु यदि कस्याप्यभावो भवति तर्हि वाक्यार्थबोधः न भवति।

(1) **आकांक्षा**– एकस्य पदस्य श्रवणान्तरं तस्यार्थं विज्ञाय अपरपदस्य शुश्रुषा तस्यार्थस्य च जिज्ञासा आकांक्षा कथ्यते। अनेन विना शाब्दबोधः न भवति। मुक्तावलीकारानुसारं यत्पदेन विना यस्याननुभावकता स्यात् तत्पदेन सह तस्य पदस्य आकांक्षा भवति। यथा–हरिः इति पदं श्रुत्वापि अस्ति तिष्ठति इत्यादिपदानाम् आकांक्षा भवति शाब्दबोधाय।

(2) **योग्यता**– एकपदार्थेन सह अपरपदार्थस्य सम्बन्धो योग्यता कथ्यते। अतः "वह्निना सिञ्चति" इत्यादौ शाब्दबोधः न भवति। योग्यताभावात।

(3) **सन्निधिः**– वाक्यार्थज्ञाने सन्निधेरपि महत्त्वं वर्त्तते। प्रहरे प्रहरे असहोच्चारितानि "गाम् आनय" इत्यादीनि पदानि वाक्यार्थबोधं न जनयन्ति।

**शाब्दबोधस्वरूपम्**

शाब्दबोधस्वरूपविषये मतत्रयं भारतीयभाषापरम्परामुपलभ्यते। अत्र प्रथमयोः द्वयोः विचारः करिष्यते।

1. धात्वर्थमुख्यविशेष्यकशाब्दबोधः।
2. प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधः।
3. आख्यातार्थमुख्यविशेष्यकशाब्दबोधः।

**वैयाकरणमते–**

वैयाकरणानुसारं वाक्ये क्रियायाः प्राधान्यं भवति। परं तैरभिमतस्य शाब्दबोधस्य विश्लेषणात् प्राक् वाक्यगतपदविश्लेषणं परमावश्यकं वर्त्तते। यथा "चैत्रः तण्डुलं पचति" इत्यत्र चैत्रः पदे अंशद्वयं चैत्र अर्थात् प्रातिपदिकं सुँ चात्र प्रत्ययः वैयाकरणैः प्रातिपदिकस्य जातिद्रव्यलिंगसंख्याकारकाः पञ्च अर्थाः मताः।
वाक्ये द्वितीये पदे "तण्डुलम" इत्यस्मिन्नपि अंशद्वयं वर्तते। अत्र चैत्रवत् "तण्डुलम् इति प्रातिपदिकस्य पञ्च अर्था सन्ति। अम् प्रत्ययस्यार्थः कर्मकारक वर्त्तते।
वाक्यस्य तृतीये पदेऽपि द्वौ अंशौ स्तः पच् धातुः ति प्रत्ययश्च। प्राचीनवैयाकरणाः पच् धातोरर्थं फलव्यापारौ मन्यन्ते, परं नव्यवैयाकरणनागेशभट्टमते धातोरर्थः फलादिवच्छिन्नव्यापारः इति भवति। एवं पच् धातोरर्थः "पाकः" इति वर्त्तते। पाकक्रिया एका न भवति अपितु अनेकक्रियाणां समूहः भवति। तिङ्प्रत्ययार्थः कर्ताकर्मकालसंख्या भवति।
वैयाकरणमते प्रत्ययार्थकर्तुः वाक्यकत्रा (चैत्रेण) सह अभेदसम्बन्धेन अन्वयः भवति। तिङर्थसंख्या समवायसम्बन्धेन प्रत्ययार्थकत्रा सह सम्बद्धाः। प्रत्ययार्थकर्तृकालयोः वृत्तित्वसम्बन्धेन धात्वर्थव्यापारे अन्वयो भवति। अम् प्रत्ययार्थे "कर्मणि" अम्प्रत्ययार्थस्य "एकत्व" इत्यस्य समवायसम्बन्धेन। तण्डुलरूपप्रकृत्यर्थस्य आधेयतासम्बन्धेन धात्वर्थे फले अन्वयः भवति। फलस्य च जनकतासम्बन्धेन व्यापारेऽन्वयः भवति। एवं "चैत्राभिनैकत्वावच्छिन्नवृत्तिः तण्डुलनिष्ठविक्लित्यनुकूलवर्त्तमानकालिको व्यापारः इति शाब्दबोधः भवति।

**नैयायिकमतम–**

नैयायिकाः वाक्ये क्रियाप्राधान्यत्वं न मन्यन्ते। एषां मते प्रथमान्तपदोपस्थाप्यमुख्यविशेष्यकः शाब्दबोधो भवति। अस्मिन् शाब्दबोधो प्रथमान्तविभक्तिकं पदं मुख्यविशेषकं भवति। वाक्यगतानि पदानि अस्य विशेषणानि भवन्ति। तद्यथा पूर्वोक्तोदाहरणवाक्ये चैत्र प्रातिपदिकेन चैत्रत्वविशिष्टवोधो भवति। एते वैयाकरणवत् प्रातिपदिकस्य पञ्च अर्थान् न मन्यन्ते। यतो हि एतेषां मते जात्याकृतिविशिष्टव्यक्तिः एव पदार्थः मन्यते।
वाक्यस्य द्वितीये पदे तण्डुलम् इत्यस्य विषये न कश्चित् मतभेदो भवति। वाक्यस्य तृतीये पदे पच् धातोरर्थः फलावच्छिन्न व्यापारम् फलावच्छिन्न व्यापारम् फलावच्छिन्न व्यापारम् फलावच्छिन्न व्यापारम् स्वीकुर्वन्ति नैयायिकाः। पचति इति पदस्य द्वितीयांशे तिङ्प्रत्ययस्यार्थविषये मतभेदो वर्त्तते। एतेषाम्मतेन कर्तृस्थाने कृतिः अर्थः भवति संख्याकालयोर्विषये न कापि विप्रतिपत्तिः वर्त्तते।
नैयायिकानां मते कृतिः चैत्रे कर्त्तरि समवायसम्बन्धेन प्रकरीभूयः भासते। पच् धात्वर्थस्य पाकस्य आख्यार्थकृतौ अनुकूलत्वसम्बन्धेन अन्वयः

भवति। नैयायिकानां मते वैयाकरणवत् आख्यार्थसंख्यायाः आख्यार्थकर्त्तरि अन्वयः न भवति अपितु सा कृतिविशिष्टकर्ता अन्वेति। तिप्रत्ययार्थः कालः कृतौ विशेषणं वर्त्तते। एवम्प्रकारेण "तण्डुलनिष्ठविक्लित्त्यनुकूल–व्यापारानुकूलकृतिमांश्चैत्रः" इति वाक्यबोधः भवति।

वैयाकरणमतनिरासः

कर्त्तरि शक्तिस्वीकारे गौरवदोषः–

नैयायिकानां मते कर्त्तरि शक्तिस्वीकारे गौरवदोषः कृतौ च लाघवो भवति। यतो हि कर्त्तरि शक्ति स्वीक्रियते तर्हि शक्यतावच्छेदकः कर्तृनिष्ठधर्मविशेषः कृतिरेव भविष्यति, सा च प्रतिकर्तृभिन्ना वर्त्तते। एवमनित्यामनन्तशक्यतावच्छेकानां कल्पनायां गौरवं भवति।

वैयाकरणानुसारं तिप्रत्ययेनानभिहितः कर्ता अतः अत्र तृतीयाविभक्तिः स्यात्। चैत्रः पचति इत्यादिस्थलेषु। अत्र नैयायिकैरुच्यते यत् यत्राख्यातेन कर्तृगता संख्या नोच्यते तत्र एव कर्ता अनभिहितो भवति। चैत्रः पचतीत्यत्राख्यातेन चैत्रगतैकत्वबोधः भवति।

परं कर्तृगतसंख्या कुत्रोक्ता कुत्र चानुक्ता भवति। अस्मिन् कः हेतुरित्युक्ते कथ्यते नैयायिकैः यत्र कर्ता कर्मत्वकरणत्वापादानाद्यविशिष्टः प्रथमान्तपदोपस्थाप्यः भवति। तत्र कर्तृगतसंख्या तिङ् इति पदेनोक्ता भवति।

**वाक्यार्थबोधप्रकाराः–**

भारतीयभाषाविज्ञानपरम्परायाः वाक्यार्थबोधविषयकाणि चत्वारि मतानि सन्ति। तद्यथा–

1. अन्विताभिधानवादः – प्रभाकरमिश्रः
2. अभिहितान्वयवादः – कुमारिलभट्टः
3. तात्पर्यवादः – जयन्तभट्टः
4. संसर्गमर्यादावादः – गदाधरभट्टाचार्यः

अत्र आरम्भिकत्रयस्य प्रामुख्येण विचारः करिष्यते।

(1) **अन्विताभिधानवादः–**

मतप्रवर्तकप्रभाकरानुसारमन्वितार्थे एव पदशक्तिर्भवति। अतः वाक्ये एव अर्थबोधशक्तिः विद्यते। बालाः वृद्धव्यवहारेण पदार्थमवगच्छति। वृद्धव्यवहारे च वाक्यान्येव प्रयुज्यन्ते न तु पदानि। जैमिनिरपि एकार्थपदसमूहमेव वाक्यं ख्यापयति। अर्थैकत्वादेकं वाक्यं साकाक्षं चेद्विभागे स्यात्। यदि अनन्वितपदैरर्थः कथ्यते चेत् तैः पदैः वाक्यार्थरूपैकार्थस्य बोधः न भवितुमर्हति। अतः अन्वितार्थे एव शक्तिग्रहो भवति।

(2) **अभिहितान्वयवादः**

अभिहितान्वयवादस्यार्थं कुर्वन् जयन्तभट्टः कथयति यत्– अभिहितानां पदार्थानामन्वयः। अर्थात् प्रत्येकं पदं स्वमर्थं ख्यापयति। पदार्थबोधे सति आकांक्षायोग्यतासत्तिभिः वाक्यगतपदार्थानामन्वयः भवति येन वाक्यार्थबोधः भवति। अतः अन्वयरहितशुद्धपदार्थष्वेव शक्तिः विद्यते।

अनेनानुसारं यद्यपि क्रमेण उच्चारितानां पदानां विस्मरणं भवति तथापि तेषां पदानामर्थस्मरणं तु तिष्ठत्येव तेन च श्रोतुः वाक्यार्थबोधः भवति। अन्वयव्यतिरेकेणापि सिध्यत्येत। यथोच्यते **न्यायमञ्जरीकारेण**

"पदार्थप्रतिपत्तिपूर्वकत्वात् वाक्यार्थप्रतिपत्तेः न ह्यनवगतपदार्थस्य वाक्यार्थसम्प्रत्ययो दृश्यते।"

**मीमांसकमतनिरासः तात्पर्यवादश्च**

जयन्तभट्टेन मीमांसकानां मतद्वयमपि निरस्य तात्पर्यवादस्य स्थापना कृता। तदनुसारमत्र तस्य मतमत्र प्रदर्श्यते

(1) **अन्विताभिधानवादखण्डनम्–**

यद्यपि वृद्धव्यवहारेण वाक्यार्थबोधो भवति तथापि अस्मिन् केचन दोषाः सन्ति।

- यदि वाक्ये एव पदशक्तिः स्वीक्रियेत चेत् वाक्यसंख्यायाः आनन्त्यात् प्रतिवाक्यं शक्तिः स्वीकर्त्तव्या भविष्यति येनानन्त्यदोष आपद्यते।
- पदस्य मुख्यार्थबोधकशक्त्या वाक्यार्थबोधो न भवति अपितु तात्पर्यार्थबोधयितृपदशक्त्यः अर्थात् तात्पर्यशक्त्या वाक्यार्थबोधः भवति।

(2) अभिहितान्वयवादखण्डनम्

अस्य मतस्य खण्डनं कुर्वन् जयन्तभट्ट कथयति यत् व्युत्पत्तिनिरपेक्षः शब्दः दीप इव अर्थं नावगमयति अपितु संकेतग्रहे सत्येव पदैः पदार्थबोधः भवति। वृद्धव्यवहारे च वाक्यप्रयोगः एव भवति न तु पदप्रयोगः। वक्ता अन्वितार्थमवगमयितुं वाक्यं प्रयुङ्क्ते स चार्थः संसृष्ट एव भवति। यथोच्यते

अर्थप्रकरणप्राप्तपदार्थान्तरवेदने।

पदं प्रयुज्यते यत्तद्वाक्यमेवोदितं भवेत॥

वक्ता वाक्यं प्रयुङ्क्ते च संसृष्टार्थविवक्षया।

तथैव बुद्धयते श्रोता तथैव च तटस्थितः॥

**तात्पर्यवादः**

तात्पर्यवादानुसारं पदानि संहत्यकारितया वाक्यार्थं कथयन्ति। संहत्यकारिता एव तात्पर्यशक्ति बोधिका वर्त्तते।

अभिधाशक्त्या पदानि स्वस्वमर्थभिदधति परं तान्येव पदानि वाक्ये प्रयुक्तानि तात्पर्यशक्तियुतानि भवन्ति। अनया शक्त्या एव पदार्थेष्वन्वयः भवति। अतः

वाक्ये परस्परान्वितानां पदार्थानां प्रत्यायनमेव तात्पर्यशक्त्याः व्यापारोऽस्ति। शक्ति चै तावत् कार्यशीला भवति यावत् वाक्ये परस्परान्वितपदार्थाः श्रोतुः ज्ञानस्य विषयीभूताः न भवन्ति। यथोच्यते "संहत्यकारिताप्यस्ति न चान्विताभिधानम् अन्विताार्थं पदानि संहत्य सम्पादयन्ति न त्वन्वितमभिदधति।" पदान्यन्वितं प्रत्यायन्ति नान्वितमभिदधति। नाभिधात्रीशक्तिरन्वितविषया
किन्त्वन्वयव्यतिरेकावगत–निष्कृष्टस्वार्थविषयैव।
तात्पर्यशक्तिस्तु तेषामन्वितावगमपर्यन्ता सह व्यापारात्
अभिधात्री मताः शक्तिः पदानां स्वार्थनिष्ठता।
तेषां तात्पर्यशक्तिस्तु संसर्गावगमावधिः।।
भाषाविज्ञाने शाब्दबोधविषयकं चिन्तनम–
आधुनिकभाषाविज्ञानस्योत्पत्तिः पाश्चात्यदेशेष्वभवत। अनेनैव स्पष्टं यत् भाषाविज्ञानस्योपरि तत्रत्य दार्शनिकतर्कशास्त्रमनोविज्ञानस्य प्रभावः दृश्यते। पाश्चात्यदर्शने तर्कशास्त्रे मनोविज्ञाने च निर्दिष्टानां शाब्दबोधविषयकप्रतिपादितानां सिद्धान्तानां विभाजन त्रिधा करोति। तद्यथा–
(1) वस्तुनिर्देशवादः
(२) अवधारणावादः
(३) व्यवहारवादः

**वस्तुनिर्देशवादः–**

एतस्मिन् सिद्धान्ते तद्वस्तु शब्दास्यार्थः मन्यते यत् शब्देन निर्दिश्यते। एतस्मिन् सिद्धान्ते मन्यते यत् प्रत्येकं सार्थकः शब्दः कस्यापि वस्तुनः नामरूपेण प्रयुज्यते अथवा केनापि वस्तुना तस्य कथमपि सम्बन्धो भवति।
एतदावश्यकं नास्ति यत् निर्दिष्टः पदार्थः वस्तु एव स्यात् गुणोऽपि भवितुमर्हति अथवा वृत्तिः वस्तुरिधतिर्वा अथवा सम्बन्धोऽपि भवितुमर्हति।
शब्दार्थविषयकः अपरः वस्तुनिर्देशवादः अपरः वस्तुनिर्देशसिद्धान्तः स वर्त्तते यस्मिन् शब्दस्यार्थः शब्दवस्तुनोर्मध्ये स्थितः सम्बन्धः भवति।

**वस्तुनिर्देशखण्डनम्–**

प्रथमसिद्धान्ते आपत्तिः वर्त्तते यत् एकनिर्दिष्टवस्तुनः कथनं द्वाभ्यामधिकैर्वा भवितुमर्हति परमुभयोः शब्दयोरर्थः पृथक् भवति। यथा लंकापतिः रावणः उभावपि शब्दौ एकमेव अर्थं निर्दिशतः परं तयोरर्थः पृथक् वर्त्तते।
द्वितीये सिद्धान्ते एषापत्तिरस्ति यत् सम्बन्धे वस्तुनिर्देशस्य सिद्धान्तः न तावन्मान्यः यावत् तेषां वस्तुनिर्दिष्टता न प्रमाणीक्रियते। भाषायाः बहूनि पदानि ईदृशानि अपि भवन्ति। यैः वस्तुरूपस्यार्थस्य निर्देशः न क्रियते। यथा अपि, ननु, किल चेत्यादीनि।

तृतीयसिद्धान्तमेतेषामेतत् यत् शब्देन व्यक्तिः न गृह्यते अपि तु जातिरेव गृह्यते। मतमेतदाक्षिपन्। सेजवद कथयति यत् शब्देन जातिबोधः स्यात् चेत् जातिबोधकप्रत्ययं नियोक्तुमावश्यकता न स्यात। यथा गो जातिबोधाय गोपदेन सह त्व प्रत्ययः नियुज्यते। आंग्लभाषायाञ्च Ness Hood इत्येतौ नियुज्येते।
नैयायिकदृशा वस्तुवादविश्लेषणम सेजवद महोदयस्य प्रथमसिद्धान्तस्योपरि आक्षेपः यत् एकं वस्तु निर्दिश्यमानयोः शब्दयोरर्थं पृथक् भवितुमर्हति अतः शब्देन वस्तुनिर्देशसम्बन्धः नोपपद्यते।
यदि न्यायदृशा पश्यामश्चेत् शब्दः चतुर्विधान् अर्थान् ज्ञापयति द्रव्यं गुणं जातिं क्रियां चेति। एकं वस्तु ज्ञाप्यमानाः शब्दाः अनेकार्थाः भवन्ति। तेभ्यः तस्य वस्तुनः वैशिष्ट्यस्य वस्तुगतधर्माणाम् उपाधीनां च ज्ञानं भवति। यथा कमल इति शब्दनिर्दिष्टवस्तुनः अभिधानं पंकजोऽपि वर्त्तते यत् तस्य वस्तुनः पंकजात् उत्पत्तिक्रियायाः क्षमतां ज्ञापयति क्रियागुणौ द्रव्याश्रितौ अथवा वस्त्वाश्रितौ एव भवतः। अतः अर्थस्यारोपणं वस्तुनि एव भवति।
द्वितीयसिद्धान्तस्योपरि आक्षेपं कुर्वन् वदति यत् यदि च ननु इत्येतेषां सम्बन्धं वस्तुनि निर्देशतः न भवति यदि न्यायदृशा पश्यामः चेत् च इत्यादयः शब्दाः द्वयोः वस्तुनोः संयोगं स्थापयन्ति। अन्यान् गुणान् च संयोगः एकः गुणः स च द्रव्याश्रितः एव।
तृतीयं मतमाक्षिपन् तेनोच्यते यत् शब्देन जातिः गृह्यते सति जातिबोधकप्रत्ययस्य व्यर्थता स्यात। परं न्यायमते अस्य समाधानं वर्त्तते। यत् जात्याकृतिव्यक्तस्य पदार्थाः भवन्ति। गो शब्दोच्चारिते गोत्वविशिष्टायाः गोः ग्रहणं भवति।

**अवधारणावादः–**

एतन्मतानुसारं विचारस्य स्वतन्त्रसत्ता वर्त्तते यस्य सम्प्रेषणं शब्देन सम्भवति। अस्यार्थः त्रयः नियमाः सन्ति। तद्यथा
1. शब्देनाभिव्यञ्जमानः विचारः वक्तुः मनसि स्यात।
2. विचाराभिव्यक्तये वक्त्रा उपर्युक्तशब्दं चिनुयात।
3. विचारसम्प्रेषणसाफल्याय एतद् आवश्यकं यत् वक्त्रा प्रयुक्तः शब्दः श्रोतुः मनसि तमेव विचारमुत्पादयेत् यस्य विचारस्य अवस्थितिः वक्तुः मनसि शब्दप्रयोगसमये भवति।

**न्यायमतदृशासिद्धान्तपर्यायलोचनम् –**

यदि विचारः बोधः सम्प्रत्ययो वा अर्थः स्यात्तर्हि बाह्यवस्तूनां तन्निहितगुणक्रियादीनां वैयर्थ्यं सिध्यति। अपि च बोधः अथवा विचारः शब्दनिरपेक्षः

न भवति न्यायानुसारमर्थस्य सत्ता वर्त्तते। तस्य चाभिधानं शब्देन भवितुमर्हति यथोच्यते।
"द्रव्यादिसप्तपदार्थानां ज्ञेयत्वमभिधेयत्वम।"
अतः शाब्दबोधप्रक्रियायां प्रयुक्तः वृद्धव्यवहारः तज्जन्यशाब्दबोधो पदं जातिविशिष्टव्यक्त्यर्थग्रहणं एव भाषिकव्यवहारमर्थप्रक्रियावगमनाय युक्तम।

**व्यवहारवादः**—

अनेनानुसारेण वक्तृशब्दोच्चारणजन्यश्रोतुः प्रतिक्रिया एव शब्दस्यार्थः भवति। यदा वक्ता परिस्थित्यनुसारं कमपि वाक्यमुच्चरयति तदा सः श्रोतुः प्रतिपत्तये तेन माध्यमेन किमपि विवक्षति तदपि शब्दस्यार्थः भवति।

**उपसंहारः**—

भाषाविज्ञानस्य परम्परायां यत् शब्दार्थप्रत्ययविश्लेषणं वर्त्तमानसमये विधीयमानमस्ति, ततोऽपि पूर्वं भारतीयभाषाविज्ञानपरम्परायां नैयायिकैः जगतः पदार्थदृशा विश्लेषणं विहितम। यथा अस्माभिरवलोकितं यत् पाश्चात्यदर्शने प्रतिपदस्य सम्यग् विश्लेषणं न विहितं परं भारतीयन्यायपरम्परायां प्रत्येकशब्दस्य विश्लेषणं कृत्वा अर्थेन कथं सः शब्दः सम्बन्ध्यते इत्यस्य विवेचनं सम्यक् विहितम।

**सन्दर्भग्रन्थाः**


1. अष्टाध्यायी, पाणिनि, सं. ब्रह्मदत्त जिज्ञासु, रामलालकपूर ट्रस्ट, २००६ ई.
2. काशिका, वामन जयादित्य, व्या. रघुवीर वेदांलकार, चौखम्बा ओरियन्टालिया, २००६ ई.
3. तर्कभाषा, केशवमिश्र, सं. विश्वेश्वर, चौखम्बा संस्कृतभवन, वाराणसी, २००८ ई.
4. तर्कसंग्रह, अन्नम्भट्ट, व्या. गोविन्दाचार्य, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०११ ई.
5. न्यायदर्शन (वात्स्यायनभाष्यम)
6. न्यायमञ्जरी, जयन्तभट्ट, सं. गौरीनाथशास्त्री, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी
7. न्यायसिद्धान्तमुक्तावली, विश्वनाथ, सं. ढुण्ढिराज शास्त्री, चौखम्बा संस्कृतप्रतिष्ठान, २००३ ई.
8. महाभाष्यम, पतञ्जलि, व्या. युधिष्ठिरमीमांसक, रामलालकपूर ट्रस्ट रेवली,२००५ ई.
9. परमलघुमञ्जूषा, नागेशभट्ट, व्या. लोकमणि दाहाल, चौखम्बा सुरभारती प्रकाशन, २००३ई.
10. वैयाकरणभूषणसारः, कौण्डभट्टः, व्या.चन्द्रिका प्रसाद द्विवेदी, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०११ई.
11. शाब्दबोधमीमांसा,रामानुज ताताचार्य, राष्ट्रिय संस्कृत संस्थान नई दिल्ली, २००५